१०३
४

103
4

अथ

ग्रन्थनामः-	"स्थालीपाकप्रयोगः"
कर्तृनामः-	'नारायणभट्टः'
विषयः-	'प्रयोगः'

Sthalipaka Prayogaha.

300

स्था॰ला॰ ॥२॥ व्यजनं वामे घृतपात्रं च धारयेत् ॥ मेषारूढो जटावद्धो गौरवर्णो महौ श्रीराम
जसः ॥ धूम्रध्वजो लोहिताक्षः सप्तार्चिः सर्वकामदः ॥ आत्माभिमुख
मासीन एवंरूपो हुताशनः इति ॥ ततोपदिसमिधौ दौ समारोपितो द्वा
ग्निस्तर्हि प्रत्यवरोहणं कार्यं ॥ तच्चैवं ॥ प्रत्यवरोहेति मंत्रस्य हिरण्यग
र्भोग्निस्त्रिष्टुप् ॥ अग्निप्रत्यवरोहणे विनियोगः ॥ प्रत्यवरोह जातवे
नं दः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् ॥ प्रजां पुष्टिं रयिमस्मासु धेह्य
थाभवयजमानाय शं योः ॥ इतिमंत्रेण समारोपिताग्निः समिधं स्था
पितेग्नौ प्रक्षिपेदिति ॥ एतदंतं संस्थापितेग्नौ होमकार्येभिनित्यधा
रितहोमे तु नैतावत् ॥ ततः पार्वणस्थालीपाकप्रधानदिना सूर्वादि ॥२॥

103/4 ✓

१ × नत्रयजमानः × १

श्रीगणेशाय नमः ॥ ॐ ॥ कृतनित्यक्रियः शुचिः परिहितधौतवासाः दर्भपाणिः
पीठोपविष्टः प्राङ्मुखो वाग्यतो द्विराचम्य प्राणानायम्य देशकालौ सं
३ श्री कीर्त्य परमेश्वरप्रीत्यर्थं अमुककर्म करिष्ये ॥ तदंगं कुंडस्थंडिलादिकरि होमं ३
ष्ये इति संकल्प्य ॥ गोमयादिलिप्ते शुचौ देशे शुद्धमृदा इष्टकान्यां तमुद
जलुरस्त्रं कसंस्थं चतुरंगुलोन्नतमंगुलोन्नतं वा चतुर्दिक्षु लिखादिसस्तत्यंगु मि ५
ल्वेपरिधि कंफलितमष्टादशांगुलविस्तृतं होमानुसारेण तदधिकं वा
नतु ततो न्यूनं मध्योन्नतं स्थंडिलं कुर्यात् ॥ तद्गोमयेन प्रदक्षिणमुपलिप्य पलि
दक्षिणेशोदीच्यां दक्षे प्रतीच्यां चतुः प्रादेशमध्यमित्यंगुलानि सप्तक्ता द
क्षिणोपक्रमामुदक्संस्थां प्रादेशमात्रामेकां रेखां लिखेत्तयोर्मध्ये

353

स्थाप्य तस्योदक्षिणोत्तरयोः प्रागायते पूर्वरेखाया असंसृष्टे। प्रादेशमिते ते
।।३।। द्वे लेखे लिखित्वा तयोर्मध्ये दक्षिणत आरभ्य परस्परमसंस्पृष्टाः
प्रागायता उदक्संस्थाः प्रादेशसंमिताः तिस्र इति षड्लेखाय
ज्ञियत्राकस्तम्भूलेन दक्षिणतरस्त्ये नोल्लिख्य लेखासु तथैवोल्मुदग
मं निधाय स्थंडिलमद्भिरभ्युक्ष्य त्राकलमाग्नेय्यां निरस्य पाणिं प्रक्षा
ल्य वाग्यतो भवेत्।। ततस्तैजसेनासंभवे मृन्मयेन वा त्रयुग्मे पा ४
गा न संपुटीकृत्य सुवासिन्या श्रोत्रियागाराद्वा स्वगृहाद्वा समृद्धमनिधूमम
१ हा ग्निमाहत्य तं स्थंडिलेग्नेय्यां निधाय। एह्यग्ने राहूगणो गौतमोग्निस्त्रि
ष्टुप्। जुष्टो दमूनो आग्नेयो वै सुश्रुतोग्निस्त्रिष्टुप्। आनयावाहने विनियो ।।३।।

गः।। एह्यग्ने राहूगणो जुष्टो दमूना इत्यस्य तैरावाग्नौ ह्रनं हरीकस समस्त छा
व्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती।। अग्निमत्तिष्ठापने
विनियोगः।। ॐ भूर्भुवःस्वरित्याहमाभिमुखपाणिन्योषट्सु लेखा
सु तत्तत्कर्मसु विहितनामकं ममकं मुनामकमग्निं प्रतिष्ठापयामी॥ प ।मंत्र
नि प्रतिष्ठाप्य।। प्रोक्षितं धनानिक्षिप्य वेणुधमन्या प्रबोध्य ध्यायेद्देवं।
गौतमो। चत्वारि शृंगा वामदेवाग्निस्त्रिष्टुप्। अग्निध्याने विनियोगः।। चत्वा मर्ति
रि शृं०।। स्मृतिमंत्राभ्यास सहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः।
त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः।। स्वाहां तु दक्षिणे पार्श्वे देवीं
वामे स्वधां तथा।। बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवं तोमरं

नैऽएवं प्रातः रौपासनं हुत्वान्वाधानं कुर्यात्॥ तत्र्यथा॥ आचम्य प्राणाना
यम्य समिद्धयं त्र यं वा दाय देशकालौ स्मृत्वा मम मोपात्त दुरितक्षयद्वारा श्रीप
रमेश्वर प्रीत्यर्थं दर्शपूर्णमासाभ्यां स्थालीपाकाभ्यां यक्ष्ये॥ तत्रेदानीं पौ
र्णमासेन यक्ष्ये॥ दर्शे तु॥ पूर्वस्मिं कल्पिते न दर्शस्थालीपाकेन यक्ष्य इति
विशेषः॥ तत्र देवता परिग्रहार्थमन्वाधानं करिष्य इति संकल्प्यास्मिन्नन्वा
हिते ग्नौ जातवेदसम ग्निं इध्मेन प्रजापतिं प्रजापतिं चाघार देवते आज्ये
न अग्नीषोमौ चक्षुषी आज्येन अग्निम ग्नीषोमौ च प्रधान देवं त्य रु त
द्रव्येण दर्शे तु अग्निमिंद्राग्नी च प्रधान देवते चरु द्रव्येणेति विशेषः॥
२ से शेषेण स्विष्टकृतम ग्निमिध्मसंनहनेन रुद्रमयासमग्निं देवान् विष्णुम ष्णु२
ग्निं वायुं सूर्यं प्रजापतिं चैताः प्रायश्चित्त देवता आज्येन सौताङ्ग।

॥३॥ तद्दोषनिबर्हणार्थं त्रिवारमग्निं मरुतस्साज्येन विश्वांदेवांसंस्नावेण। अंगदे
वताः प्रधानदेवताः स चरुः सन्निहिताः संतु एवं सांगोपांगेन कर्मणाभ्यायक्षे
मसद्यस्कालेनुसद्यायक्ष्यइतिसंकल्प्य लक्ष्यं समस्तव्याहृति। भिर्वा समिद्धो
मं कुर्यात्॥ व्याहृतिपक्षे व्याहृतीनामित्यादि पूर्ववत्॥ अन्वाधानसमिद्धोमे
विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहेति प्रजापतय इदं न मम। इत्यागः॥
तं चाग्निं धारयेत्॥ संकल्पदेतु तुभ्यं ता अंगिरस्तम इत्युच्चार्य आज्यं हुत्वा स
मारोपयेत्॥ तद्यथा॥ तुभ्यं ता विरूपोग्निर्गायत्री॥ कृतान्वाधानाग्नेः स
मारोपाधिकारसिध्यर्थं प्रायश्चित्ताज्याहुतिहोमे विनियोगः॥ तुभ्यं ता
अंगिरस्तम विश्वाः सुक्षितयः पृथक्॥ अग्ने कामाय येमिरे स्वाहा॥ अ ॥३॥

स्था०प्र० संनिहनने केचिन्मंत्रा विछंति॥ तत्र वर्हिषि॥ इंद्राण्यै संनहनं पूषा तत्ग्नंथिं
॥६॥ वध्नातु स तेमा स्थादिति इध्मीय कृष्णोरूपं कृत्वा माविशास्त्वं वनस्पतीन्॥
ततस्त्वा पंचदशधा संभरामि सुसंभृता त्वां संनरामि कृष्णोस्याखरेष्ठो
देवेपुरश्चरस ध्यासं त्वा इति एकविंशति धे सत्र पंचदश॥ धे सहेना।
नै५ अन्ये तु नहमाहुः॥ अपरे तु मंत्रैः घ्नंति ततः पत्नी आन्यायतनीलं कर
पांकुर्यात्॥ ततो दंपती गंधादिभिः स्वशरीरं अलंकृत्य तद्दिने कलह
क्रियविक्रय महासान्नत बहुभाषण चौर्यादि व्यसन पर्यंक शयन दंत
धावन करंभ कुलि भकोद्रव चणक मसूर वंताक क्षार लवणको
रदूषक मधु माषमांस मद्य परान्नोपवास तैल मैथुनानि वर्जयेतां॥
दधि घृत पयोभिर्हविष्यान्नं दिवैव सकृद् जीयातां॥ आधानकर्तुः॥६॥

आशक्तः मासादंनं भुंजीतां व्रतलोपे व्रात्यै सह संवेशने वाऽभ्युपोष्य
इ२ त्वमग्ने व्रतपाऽअसीत्यृचाज्याहुतिं जुहुयात्॥ नद्यथा॥ त्वमग्ने व्रत
पाऽइत्यस्य वसोऽग्नि गायत्री॥ व्रतलोपजनितदोषपरिहारार्थंऽआ
ज्य होमे नियोगः॥ त्वमग्ने व्रतपाऽअसि देवऽआमर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः
स्वाहा॥ व्रतपायाग्नय इदं न मम॥ यद्दानिर्वापादि पूर्वकं व्रतपायाऽ
ग्नये पार्वणस्थालीपाकेन समानतंत्रकं चरुं प्रधानात्पूर्वं जुहुयात्॥
ततः प्रतिपद्यमानरौपासनं हुत्वाऽग्निं परिसमुह्य परिस्तृणीया
त्॥ तत्रेयं॥ अग्न्यायतनाद्दंगुलिपरिमितदेशाद् ईशानीं दिशमा
रभ्य प्रदक्षिणं समंतात्सोदकेन पाणिना त्रिः परिसमूह्य पूर्वमुप

त्रिनिहितदर्भैर्द्व्यंगुलपरिमितेर्देशप्राच्यादिषु परिस्तरणीयाः तत्र प्राच्यां तृ१॥
प्रतीच्यां चोदगग्रान्दर्भान् अवाच्यामुदीच्यां च प्रागग्रान् ॥ पूर्वपश्चात्परि दर्भाः ॥२
५ स्तरणमूलयोरुपरि दक्षिणपरिस्तरणं उत्तरपरिस्तरणमूलं मुदगग्रयोर त
धस्तात् ॥ तत्र दर्भाः ॥ अनियतसंख्याः एकैकस्यां दिशि चत्वारो द्वैवंषो
डश वा ॥ ततोऽग्नेर्दक्षिणतो ब्रह्मासनार्थं उत्तरतश्च प्रणीतासादनार्थं
कांश्चित्प्रागग्रान्दर्भान् स्तृणीयात् ॥ अग्नेरीशानादित्रिरंभसा परिषि राम
च्य उत्तरास्तीर्णेषु दर्भेषु दक्षिणसव्यपाणिभ्यां क्रमेण चरुस्था
लीप्रोक्षण्यौ दर्वी स्रुवो प्रणीता ॥ आज्यपात्रे इध्माबर्हिषी शूर्प
कृष्णाजिनेउलूखलमुसलं चेति द्वंद्वे उदगपवर्गं प्रोक्षणस्थं च ५

उत्पवनं च ममं ततः स्त्रिजिः स्विन्निः कुशाद्दलैः सव्यपाणिमधोदक्षिणं चो
परिकुर्वन्पूर्वदलाग्रेरुत्तरदलमूलेभ्यस्त्रि संधिं द्विगुणां रज्जुं कृत्वा पुनर्द
क्षिणमधः सव्यं चोपरि कुर्वन्नथ वै त्रिगुणे यतत् ॥ ऊर्ध्वं ते प्रदक्षिणं ग्रंथिं द
तृत्रिं३ ध्यात् ॥ एवं च [illegible] वादर्भदिढ़ै रेकारज्जुर्भवति ॥ ततस्तस्यामुदगग्रायां प्रा
देशमात्रां मुष्टिपरिमितान्दर्भान्निधाय तया बर्हिर्द्विरावेष्ट्य रज्ज्वग्रेण
रज्जुमूलं सकृदावेष्ट्य तदग्रं शेषपूर्वविष्टितरज्ज्वोऽधस्तान्निःनीय अ
परिस्तरणाद्युपर्थं दर्भैः सहाग्न्यायतेनाऽपश्चाद्भागोपरि निदध्यात् ॥
या८ ततोऽन्यैर् [illegible] ताद्दृश्यैव कृतया रज्ज्वा उदगग्रपापादीनां [illegible] खादिरमसं भ आ८
दि१ वे शमीवट [illegible] यज्ञियवृक्षमयं अरत्निमात्रं वितस्तिमात्रं वा पंचदश द२
दारुकाष्ठमिध्मं प्रागग्रं सकृदावेष्ट्य पूर्ववन्निदध्यात् ॥ तत्र इध्माबर्हिषोश्च
रज्ज्वग्रेण रज्जुमूलं सकृदावेष्ट्य

मु आज्यासादयेत्॥ आज्यमात्रहोमे तु प्रोक्षण्यौ स्रुवौ प्रणीताज्य
पात्रे इध्माबर्हिषी चेत्येतावन्मात्रे वासादनं ततः प्रोक्षणीपात्र
मुत्तानं कृत्वा॥ तत्रानन्तर्गर्भितसाग्रसमस्थूलप्रादेशमात्रे कु
शद्वयरूपपवित्रे निधाय शुद्धाभिरद्भिः स्तत्पात्रं पूरयित्वा॥
गंधपुष्पाक्षतादि क्षिप्त्वा हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यां ~~तन्ना~~ का पू
दग्रे र्वाग्रौ पृथक्पवित्रे धृत्वा जपेत्त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा
इध्मं च विस्रस्य बौसेणिपात्राणि त्रिः प्रोक्षेत्॥ उत्तानेन तु हस्ते
न कर्तव्यं प्रोक्षणं भवेत्॥ अंवाचीनो निहस्तेन कर्तव्यं स्याद वोक्ष
णं॥ तिर्यग्भूतेन हस्तेन कृतं पर्युक्षणं भवेत्॥ मुष्टी करोतिय

तो प्रमन्नुक्षरामितिस्मतं ॥ ता आपः किंचित्कमंडलौ प्रक्षिपेद्दिर्यबे
॥६॥ नो २ तथोपयथोक्तलक्षणमीशानदिगवस्थितं ब्रह्माणमस्मिन्कर्मणि ब्रह्मा
णं त्वामहं वृणइति तत्पाणिं पाणिनागृहीत्वा वृणुयात्ततो ब्रह्मावृ
तोऽस्मीत्युक्तः ग्रामा अग्नुखोयज्ञोपवीती साचम्य समस्तपाणिं प्यंगुष्ठौ भृत्या
ग्नेणाग्निं परीत्य दक्षिणतउदग्रखास्थितं ब्रह्मासनार्थं दर्भेषु दक्षिणे नो ५
भागास्थितमेकं दर्भमंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा निरस्तः परा
वसुरितिनैर्ऋत्यां दिशि निरस्याप उपस्पृश्य इदमहमर्वावसोः सदने सीदा
मीति कूर्चोदग्रखे एक वामोरूपरि दक्षिणपादं संस्थाप्योपविश्य
गंधाक्षतादिभिरर्चितः नैसें ॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आसिष्यते ॥६॥

श्रीराम
॥७॥

वा जुष्टं प्रोक्षामीति तथैव प्रोक्षेत्। दर्भैस्तु अग्नीषोमपदस्थाने इन्द्रा
ग्निभ्यां त्वेति निर्वापे प्रोक्षणेपि विशेषः एवं नाममंत्रकहोमे निर्वापः प्रो
देवतं क्षणं च यथाप्रधानं देवतानामग्रहणं कार्यं॥ समंत्रकहोमे तु अव न२
ला कर्म होतूष्णीं चतुरश्चतुरो मुष्टीन्निर्वपेत् प्रोक्षेच्च॥ ततः पात्रा
णामुत्तरतः प्राग्ग्रीवमास्तीर्णे ऊर्ध्वलोम्नि कृष्णाजिने निहिते उलू
नप खलमुसलेऽन्यत्र हस्तात्रिः शुक्लीकुर्यात्॥ तांस्त्रिः प्रक्षालितान् पृथ
क्पात्रे एकपात्रे वा अधिदध्यान्न वस्राचितमं तरूष्मपक्वसुशृ श्रीराम
तं चरुं पचेत्॥ ततः पवित्रे आज्यपात्रे निधाय तत्प्रोक्षोपुरतः ॥७॥

संस्थाप्य तस्मिन्नाज्यमासिच्याग्नेरुत्तरतः स्थितानंगारान्भस्म
नासहाग्नेरुदक्परिस्तरणाद्बहिर्निरूह्य तेषु आज्यपात्रमधि
द श्रित्य ज्वलता दर्भोल्मुकेनावज्वल्य अंगुष्ठपर्वमात्रं प्रक्षालितं
दर्भाग्रद्वयमाज्ये प्रक्षिप्य पुनर्ज्वलता तेनैव दर्भोल्मुकेन चरुणा
सहाज्यं त्रिः पर्यग्निकृत्वा तदुल्मुकमुपास्याप स्पृष्ट्वा आज्यपात्रं
भुवि कर्षन्निवोदगुद्वास्यांगारान्नग्नौ प्रत्यस्याप स्पृष्ट्वा। तत्रस्थ
सूस्तूप ऋ मेवाज्यं सवितुष्ट्वेति हिरण्य अक्त्रो सविता पुरउष्णिक्॥ आ
ज्यस्योत्पवने विनियोगः॥ ॐ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण प
वित्रेण वसोः सूर्यस्य रश्मिभिरिति मंत्रेणैकं भुस्राद्वारितिनैकवा

स्था०पा रंद्विस्तूष्णीमुत्तानपाणिद्वयांगुष्ठोपकनिष्ठिकाभ्यामन्योन्यासंस्पृष्टं गृही ली०क
॥८॥ त्वाभ्यामुदगग्राभ्यांपवित्राभ्यांप्रागुत्पुतैर्यपवित्रेअद्भिःप्रोक्ष्याग्नौप्रहरे
त्तूष्णींस्रुवदर्व्यास्वाहेतिमन्त्रेणेतिकेचित्॥ अथाग्नेः पश्चात्परिस्तर
णाद्बहिरात्मनोग्रतोभुवंप्रोक्ष्यतत्रबर्हिःसं नीरज्जुमुदगग्रंप्रसार्यतस्मिन् नह
।बर्हिःप्रागग्रमुदगपवर्गमविरलं आस्तीर्यतस्मिन्नाज्यपात्रंनिधायस्रु
न वादिसंमार्जयेत्॥ दक्षिणनहस्तेस्रुक्स्रुवौगृहीत्वासव्येनकांश्चिद्दर्भाना
दायसहैवाग्नौप्रताप्यस्रुचंनिधायदक्षिणनहस्तेनस्रुवस्यबिलंदर्भा
ग्रैःप्राग्रादिप्रागपवर्गंत्रिःसंमृज्याधस्ताद्दर्भानिर्णेवाभ्यासबिलपृ
ष्ठेत्रिःसंमृज्यततोदर्भाणांमूलैर्दण्डसाधस्ताद्बिलपृष्ठादारभ्यायावद्दु ॥८॥

बृहस्पतेयज्ञंगोपायसयज्ञंपाहिसयज्ञपतिंपाहिसमांपाहीतिजपित्वा॥
सर्वत्रयज्ञमनाएववर्तेत॥ ततोयजमानःप्रणीतापात्रमग्नेःप्र
त्यग्निधायतत्रपवित्रेनिधायोत्सूतानिरद्भिःपूरयित्वागंधपुष्पा
क्षतान्निक्षिप्यमुखसममुद्धृत्याग्नेरुत्तरतोदर्भेषुनिधायपवित्रेगृ
हीत्वान्यैर्दर्भैराच्छादयेत्॥ ततःप्रसगग्नेःकुशेषुशूर्पंनिधायतत्रगा
गग्रपवित्रेनिधायाग्नयेत्वाजुष्टंनिर्वपामीतिमन्त्रावृत्त्याव्रीहीणां
यवानांवा चतुरोमुष्टीन्निरुप्याग्नीषोमाभ्यांत्वाजुष्टंनिर्वपामी
तितथैवनिरुप्यतेपवित्रेव्रीहीणामुपरिनिधायाग्नयेत्वाजुष्टंप्रो
क्षामीतिनिर्वापसंख्ययोत्पूतोभिरद्भिःप्रोक्षेत्॥ एवमग्नीषोमाभ्यां

परिश्राद्धिलं तांश्च बर्हिः संमृज्याद्भिः प्रोक्ष्य स्रुवं निष्टप्य आज्यस्थाल्यां उत्त
रतः स्रुगग्रपृष्ठे निधायोदकं स्पृष्ट्वा तैरेव दर्भैर्जुहूं चैवमेवं संमृज्य स्रुवादु
त्तरतो निधाय दर्भानद्भिः प्रक्षाल्याग्नावनुप्रहरेत्॥ ततः शृतं चरुं
स्रुवेण गृहीतेनाज्येनाभिधार्योदगुद्वास्याग्न्यायतने मध्येन नीचाज्याद ज्य४
क्षिणतो बर्हिषि सांतरमासाद्य पुनरप्यभिधार्य हविः पृथक्करणाय पर्णानुवाभिघा
ग्रांतरे चर्वाज्ययोर्मध्ये निधाय पैकाद शांगुलिपरिमितदेशे गंधा
क्षतपुष्पैरग्निं समंत्रकमर्चयेत्॥ तत्र मंत्रो॥ विश्वानि नद्यस्यनयो
र्वसुश्रुतोग्निस्त्रिष्टुप्॥ अग्न्यर्चने विनियोगः॥ विश्वानि नो दुर्गहा जा
तवेदः॥ ततः आत्मानं चालंकृत्सलस्तेपक्षा त्वमङ्ध्मवंधनेरजुमि

॥९॥ श्रीगणेश॥

ध्मस्थानेनिर्दीयपाणिनेध्ममादायमूलमध्याग्रेषुस्रुवेणत्रिरभिघा
र्यमूलमध्यमयोर्मध्यभागेगृहीत्वा अयंतइध्मइत्यस्यवामदेवोजातवेदा
अग्निस्त्रिष्टुप्इध्माधानेविनियोगः॥ ॐ अयंतइध्म आ
त्माजातवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिः
र्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहेतिइध्ममग्नावाधायोयजातवे
दसेअग्नयइदंनममेतिसंजपेत्॥ततःस्रुवेणाज्यमादायाग्नेराय
तनस्यवायव्यकोणमारभ्याग्नेयकोणपर्यंतंप्रजापतयइतिम
नसास्मरन्स्वाहेत्युच्चार्यधिनैरंतर्येणाज्यधारामग्नाविध्मदारूपरि
हुत्वापुनराज्यमादायायतननैर्ऋत्यकोणतईशानीपर्यंतंतये ॥९॥

धारा २

स्था॰ली॰ रभिधार्य दर्वीं स्रुचमवत्तं चाभिघार्य विधूमा~~...~~ज्योत्स्नाग्नौ अग्नये स्वाहेति पाक॰
॥१३॥ त्या॰ उभभागयोर्मध्ये प्रदेशे तत्र स्रुक्सन्देशौ वा आच्छादयंनिवदर्वीपार्श्वे ए
हुत्वा अग्नये इदं न ममेति त्यक्त्वा पुनः पूर्ववद्दर्व्युत्तरदक्षिणे हविर्भागादव पू॰३
दाय ॐ अग्नीषोमाभ्यां स्वाहेति पूर्वाहुतेः प्राग्भागे हुत्वा अग्नीषोमाभ्या
मिदं न ममेति त्यजेत्॥ पंचावत्ती तु दर्व्यामुपस्तीर्य मध्यात्पूर्वार्धाच्चा
र्धाच्च त्रिर्हविषो वदायमाभिघार्य जुहुयात्॥ पंचावत्ति न स्तु जामदग्न्यावत्स
बिदावार्ष्टिषेणास्तथैव च॥ भार्गवाः श्यावनो और्वाः पंचावत्तिन ईरिताः॥ दै
वतु॥ अग्नीषोमपदस्थाने इन्द्राग्नी~~इन्द्र~~ सर्वेभ्यां स्वाहा॥ इन्द्राग्निभ्यामिदं १०॥
न ममेति विशेषः॥ ततः पुनर्दर्व्यामुपस्तीर्य प्रथमहविर्भागस्योत्तरा

र्धतः ~~...~~ पूर्ववदवदानतो भूयोनूचीनाभिरेवांगुलीभिरवदाय दर्व्यामोप्य द्वि
तीयहविर्भागस्य तथैवावदाय पंचावत्तीन्तु हविर्भागद्वयेपि उत्तरार्धा॰ च्चा ~~...~~२
द्विरवदाय पात्रस्थमनभिघार्य अवत्तं तु द्विरभिघार्य यदस्येति हिरण्यग
र्भोऽग्निरृषिः धृतिः॥ स्विष्टकृद्धोमे विनियोगः॥ यदस्य कर्मणोत्यरीरि
चं यद्वा न्यूनमिहाकरं॥ अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं क
रोतु मे॥ अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामा
नां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहेत्येक॰ भुत्यो च्चार्या
ग्नावीशानदेशे जुहुयात्॥ स्विष्टकृतेऽग्नय इदं न मम इति त्यागः॥ त
तोऽग्नेरुत्तरतः स्थितामिध्माबंधनरज्जुमि~~...~~धायविस्र

स्वाहे

॥१२॥ स्वरुद्राय पशुपतये इति हुत्वा पत्स्वष्ठास्नुवेण प्रायश्चित्ताज्याहुतीः स
मस्तजुहुयात्॥ तत्र मन्त्राः॥ अयाश्चेति विमदाया हुग्निः पंक्तिः अ
प्रायश्चित्ताज्यहोमे विनियोगः॥ ॐ अयाश्चाग्नेस्यनभिशस्तिश्च स
त्यमित्त्वमया असि॥ अयासा वयसा ~~कृतस~~ कृतोयास हव्यमूहिषे यानो
धेहि भेषजं स्वाहेत्येकभुत्यो श्चार्यजुहुयात्॥ अग्नय अयस इदं नम
म॥ अतोदेवामेधातिथिर्देवागायत्री प्रायश्चित्ताज्यहोमे विनियोगः॥
सर्वत्रपाठवत्॥ अतोदेवाः स्वाहा देवेभ्य इदं न मम॥ इदं विष्णुर्मे
धातिथिर्विष्णुर्गायत्री॥ इदं विष्णुः॥ स्वाहा विष्णव इदं न मम॥ व्य ॥१२॥

५२

वहुत्वाग्नसक्तो चस्रुवेणाज्यमादायाग्नये स्वाहेति अग्न रुत्तर पार्श्वे
पूर्वभागे हुत्वा पुनराज्यं सोमाय स्वाहेति दक्षिणपार्श्वे तत्समं दु ञु सग्नि
हुत्वा पूर्वनिहितपात्रे चरुमुद्धृत्य पृथक्कृत्य इदमग्नये इदं अग्नीषोम
याभिति चरुभागद्वयमुत्तरसंस्थमभिमृश्यावदानधर्मेण जुहुयात्॥ एवं नाम
मन्त्रकहोमे यथादैवतविभक्तस्य चरोरभिमर्शः॥ समंत्रकहोमे तु न विभागो ना
भिमर्शश्च अथावदानधर्मः॥ स्रुवेणस्रुच्याज्यमुपस्तीर्य प्रधमप्रधान
देवता चरुभागमध्यादंगुष्ठपर्वमात्रं तिरश्चीनां भिनाभिरंगुष्ठमध्यमाना
मिनाभिः रुद्रागम्नाभिर्नखसंस्पर्शमकुर्वन् अवदायदर्व्यामोप्य ततश्च रु
पूर्वभागनिधायप्रा॥ गम्नाभिस्ताभिस्तथैवावदायदर्व्यामोप्य पात्रस्थंहवि ष्टं

स्तसमस्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजाः प्रजापतयोग्नि
र्वायुः सूर्यः प्रजापतयो गायत्र्युष्णिगनुष्टुब्बृहत्यः छंदांसि ।। भूःस्वा
हा ।। अग्नय इदं न मम भुवः स्वाहा वायव इदं न मम स्वः स्वाहा सूर्यायेदं
न मम भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम ।। इति ब्रह्मा कर्तारं प त
रिसाग्नेर्वायव्यदेशे तिष्ठन् नेता एवं समाहुतीर्जुहुयात् ।। स्वागं
तु यजमानो न कुर्यात् ।। ततस्तत्र स्थितो ब्रह्मैवं मंत्रविपर्यासादि
निपतनिमित्ते सति यद्धो देवा अभितपामस्तत्त्रिष्टुप् ।। मंत्रविपर्या
सादिनिमित्तकप्रायश्चित्ता ज्यहोमे विनियोगः ।। ॐ यद्धो देवा अ

निपातयानिवाचाचप्रयुतीदेवहेळनं।। मरुतो अस्मीँ आभिद्रुह
।।१२।। नायतेन्यत्रास्मन्मरुतस्तन्निधेतनस्वाहा।यजमानः मरुद्भ्यइदं
नमम।।अनाज्ञातमितिमंत्रद्वयस्य हिरण्यगर्भोग्निरनुष्टुप्।ज्ञाता
ज्ञातकृतदोषपरिहारार्थमा~~न्नैज्ञातकृदप~~होमे विनियोगः।।अनाज्ञा ज्य
तंयदाज्ञातंयज्ञस्याक्रियतेमिथु।।अग्नेतदस्यकल्पयत्वंहिवेत्थय
थातथंस्वाहा।।यजमानः अग्नयइदंनमम।।पुरुषसंमितोयज्ञो
यज्ञः पुरुषसंमितः अग्नेतदस्य•स्वाहा अग्नयइदंनमम।।यत्पा ।।१२।।
कत्रेत्याप्स्यस्त्रितोग्निस्त्रिष्टुप्।।न्यूनातिरिक्तपरिपूर्णहोमेविनि

॥१३ ॐ साजगतीपूर्णाहुतौविनियोगः॥ समुद्रादूर्मिरित्यादिमधुमंतंतदु
मिंस्वाहेत्येतदृतंपठन्नवयवपरिमितधाराः स्रुवंततास्रुवेणसंस्रावंहुत्वा गग्रे
भस्व ३ ॐ इदंनममसमुद्रियसत्का॥ विज्योतिषेत्यस्यजानोवृषाग्निः त्रिष्टुप्॥
विज्योतिषाबृहतेत्यनेनचेतथैवावशिष्टंहुत्वा अग्नयइदंनममेति
त्यक्त्वा॥ विश्वेभ्योदेवेभ्यःस्वाहेतिसंस्रावंहुत्वा विश्वेभ्योदेवेभ्यइदं
नममेति ततःस्तंडुलकणांत्समिद्दर्भशाकलान्यग्निःप्रोक्ष्याग्नौ
प्रहरेत्॥ पूर्णाहुत्याद्येतदंतंसमूलंप्रयोगपारिजातकारेण
लिखितमपिइदानींशिष्टानकुर्वंति अथावभृथस्नानीयम् ॥१३॥

नंकु १

र्णपा पैंत्रजलेनमार्जितु॥ नद्यथा॥ पूर्वासादितपूर्णपात्रमास्तीर्णेबर्हिषिदक्षिण
निधाय २ पाणिनानिधाय॥ तत्रगंगादिपुण्यनदीःस्मरन्दक्षिणपाणिनास्पृ
शेत्॥ पूर्णमसिपूर्णंमेभूयाः सुपूर्णमसिसुपूर्णंमेभूयाः सद
सिसन्मेभूयाः सर्वमसिसर्वंमेभूयाः अक्षितिरसिमामेक्षेष्ठा ४
इतिजपित्वाकुशाग्रैः आगादिपंचेदिक्षुजलंमंत्रैर्यथालिंगं
सिंचेत्॥ तत्रमंत्राः॥ प्राच्यांदिशिदेवाऋत्विजोमार्जयंतां॥ दक्षि
णस्यांदिशिमासाः पितरोमार्जयंतां॥ प्रतीच्यांदिशिगृहाः
पशवोमार्जयंतां॥ उदीच्यांदिशिसप्तऋषयःपशवोमार्जयंतां॥ उर्ध्वा
यांदिशियज्ञः संवत्सरः प्रजापतिर्मार्जयंतां॥ इत्येकश्रुत्यापठ
× स्यापओषधयोवनस्पतयो २ ×

प्रनिद्दिशं सिक्काकुशाग्रैर्वसिरसिमार्जयेत्॥ तत्रमंत्राः॥ ओंपो अस्मान्ि ॥१९
त्यस्य देवश्रवा ऽ आप स्त्रिष्टुप्॥ मार्जने विनियोगः॥ ओं पो ऽ अस्मान्मा
तरः शुन्धयंतु घृतेन नो घृतप्वः पुनंतु॥ विश्वं हि रिप्रं प्रवहंती देवीरुदि
दा भ्यः शुचिरापूत एमि॥ इदमापः सिंधुद्वीप आपोनुष्टुप्॥ मार्जने
विनियोगः॥ इदमापः प्रवहत यत्किं च दुरितं मयि॥ यद्वाहमभि
दुद्रोह यद्वा शेप उतानृतं॥ सुमित्र्यान ऽ आप ओषधयः संतु दुर्मित्रियास्तै
ते सं त्वौ भार्जनं कुर्यात्॥ दुर्मित्र्यास्तस्मै संतु यो स्मान्द्वेष्टि यं च वयं द्विष्मः
संहन्मिरुतिनि र्ऋतिदिशां कुशाग्रैरपः सिंचेत्॥ ततो ब्रह्मा यजमानवा
मपार्श्वस्थितः पत्नयंजलौ पूर्णपात्रस्थं जलं॥ ओं माहं प्रजां परासिचं ॥१९

योगः॥ पत्नाकत्रामनसा दीनदक्षानय॥ स्वाहा यजमानः अग्नये इदं नम
म॥ स्कंनभिनाघ्यनियतानि भित्तैस तिव क्ष्यभाणप्रकारेण तत्र प्रतिपदोक्त
जपहोमान्कुर्याद्ब्रह्मा ब्रह्मणोभावे यजमान एवैतान्प्रायश्चित्तादीन्कुर्या
न्यस्मै वरं दद्यात्॥ ततो यजमानः सर्वकर्मप्रपूरणार्थं इदं द्रव्यदा पूर्णा
हुतिं जुहुयात्॥ तद्यथा॥ स्रुवेणाज्यं गृहीत्वा स्रुचं समबिलां पूरयित्वा॥
तस्यां स्रुवमूर्ध्वबिलं निधाय पुनरधोबिलं निधाय स्रुवाग्रे कुशा
माक्षतानि धायसव्यपाणिना स्रुक् स्रुवमुद्धृत्य दक्षिणपाणिना स्रुक्स्रु लेधत्वा
वं शंखमुद्रया गृहीत्वा तिष्ठत्समपादः ऋजुकायः स्रुवाग्रन्यस्तदृष्टिः प्र
संन्नात्मा समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य वामदेव आपस्त्रिष्टुप्

पि२

श्र४प्र ज्ञां विद्यां बुधिं श्रियं बलं आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन ॥ ॐ नम४ ॥
॥१५ लनो ब्रह्मांत न्नेव खिबा एतेरे वो पनिष्ठेन ॥ नन४ कतो आ चारान्नमान१
३ स्तोकै तिकुत्सो रुद्रो जगती ॥ विफलिग्रहणे विनियोगः ॥ मानस्तोके इति स्रु
चबिल प्टेष्ठं नवि भूलिंग्रहीत्वा ॥ ओं त्र्यायुषं जमदग्नेरिति ललाटे कश्यप
स्य त्र्यायुषमिति कंठे ॥ अगस्त्यस्य त्र्यायुषमिति नाभ्यां यद्देवानां त्र्यायु
षमिति दक्षिणस्कंधे तन्मे अस्तु त्र्यायुषमिति वामस्कंधे शतायुषमिति
शिरसि धारयेत् ॥ केचिन्नोपस्थानात्पूर्वं विभूतिधारणमाहुरिति ॥ तत
कृतापरिस्तरणो निविंस ... अग्निं परिसमुह्य परिषिच्य विश्वानिन ॥१५

इत्यर्चयित्वा नवा च पुष्पादिभिः ... नैवेद्यं तांबूलं च निवेद्य ब्रह्म
णे यथोक्तां दक्षिणां दद्यात् दक्षिणाभावे हुतशेषं घृतादि सहिरण्यं दत्वा
च ब्रह्माभावे न्यसेद्ब्राह्मणापदत्यां पात्रे प्रक्षेप्तव्यम् पूर्वविक्रमेण द्दह्रा
स्ज्यपस्य स्मृत्येति श्रीविष्णुं नत्वाचम्य धृतपवित्रार्थो विस्तस्य द्रुधदेश
क्षिपेत् ॥ दर्शेतु ॥ अग्नीषोमपदस्थाने इंद्राग्नी इतरत्सर्वं समानं च व
दर्शितमेवं सघस्कालात् यां पौर्णमास्यामगत्वोको भयत्रै पागादिनै भात
र्शमानंतरमेवान्वाधायस्याव र्हिषि संनह्ये हित्नयोगं कुर्यात् ॥ श्रीमद्
द्विद्वन्मुकुटमणिक्य श्री... सूरिसूनुना रंगपण भट्टविरचित

मल वा स्व

353

स्थाली०

॥१६॥ इदं पुस्तकं मणेरी इत्युपनामकसुबादीक्षितात्मज नारायणस्येदं पुस्तकं रा

बालकृष्ण कं शके १७२० कालयुक्ताक्षी संवत्सरे माघवद्य त्रयोदश्यां इंदुवासरे

संध्याप्रातःकाले प्रथम मया इदं पुस्तकं समाप्तं। ५५ ५५ ५५

३६ श्रीरस्तु ०॥ स्थालीपाकः समाप्तः॥ श्रीरस्तु॥ ०॥ आग लहाय

प्र०॥ मलनिर्मोचनं पुंसां जलस्नानं दिने दिने ॥ सकृद्गीताम्भसि स्नानं

०॥श्री संसारमलनाशनं ॥ ३॥ छ॥ कृष्णाय यादवेंद्राय ज्ञानमुद्राय योगि राम

०॥श्री गिने ॥ नाथाय रुक्मिणीशाय नमो वेदांतवेदिने ॥ २॥ छ ३६

श्री भाऊदीक्षित मणेरीकर लिखितस्वार्थंपरोपकार्थं सांबासकृष्णार्पणं॥

हरहरहरहरहरहरहरहरहरहरहरहरहरमहादेव॥ छ रा॥ छ॥ राम॥ शिव ॥१६॥

पाक०

यानः॥ सयावरीस्थन॥ समुद्रे वो निनयानि स्वं पाथो अपीथेति मंत्रमेक श्रुत्या पत्न्या वान्वयं निस्वयं

वा पठन् प्रत्यङ्मुखं निषिच्यांजलिस्थजलैः पापापनोदार्थं आत्मानं यजमानं पत्नीं च प्रो

क्षयेत्॥ पत्नीतज्जलं बर्हिषि निषिंचेत्॥ अथवा यजमान एव स्ववामपाणिधृतेन बर्हिषि

निधाय तत्र दक्षिणपाणिना पूर्णपात्रमादाय माहं प्रजामिति येनेन तज्जलं प्रत्यङ्मुखो नि

षिच्य ता आपः समुद्रं गच्छतीति ध्यात्वा पाणिस्थजलैरात्मानं पत्नीं च प्रोक्षयेत्॥ नन॥

कर्त्री अग्नेर्वायव्ये स्थित्वा संस्थाजपेनोपतिष्ठेत्॥ अग्ने त्वं न इति चतसृणां गौपायनालौ

पायना वा बंधुः श्रुतबंधुः विप्रबंधुश्चैक ऋचो ऋषयः॥ अग्निर्देवता द्विपदा विरा

ट् छंदः॥ अग्न्युपस्थाने विनियोगः॥ ॐ अग्ने त्वं नो अंतम उत त्राता शिवो भवा

वरूथ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः॥ सनो [illegible] ॐ

च मे स्वरश्च मे यज्ञोप च ते नमश्च॥ यत्ते न्यूनं [illegible] तस्मै ते नमः॥ स्वस्ति श्रद्धां मेधां यशः अग्नये नमः

न्युपयज्ञेतिरिक्तं तस्मै

अथ

नारायणभट्टप्रणीतः

७ स्थालीपाकप्रयोगप्रारंभः श्रीरस्तु ७

श्रीगणेशायनमः ॥ ॐ ॥ तत्रयजमानः ॥ कृतनित्यक्रियः शुचिःपरिहितधौतवासादर्भ
पाणिः पीठोपविष्टः प्राङ्मुखोवाग्यतोद्विराचम्य प्राणानायम्यदेशकालौसंकीर्त्य
श्रीपरमेश्वरप्रीत्यर्थंअमुककर्मकरिष्ये ॥ तदंगहोमंकर्तुंस्थंडिलादिकरिष्यइतिसं
कल्प्य ॥ गोमयादिलिप्तेशुचौदेशेशुद्धमृदाईशान्यांरमुदक्संस्थंचतुरस्रंचतुरं
गुलोन्नतमंगुलोन्नतंवाचतुर्दिक्षुमिलित्वाद्विसप्तत्यंगुलपरिधिकंफलितमष्टादशां
गुलविस्तृतंहोमानुसारेणतदधिकंवानतुततोन्यूनंमध्योन्नतंस्थंडिलंकुर्यात् ।
तद्गोमयेनप्रदक्षिणमुपलिप्यदक्षिणेष्टौउदीच्यांद्वैप्रतीच्यांचतुःप्राच्यामर्धं २

मित्यंगुलानित्युक्त्वा दक्षिणोपक्रमामुदक्संस्थांप्रादेशमात्रामेकांलेखांतस्यादक्षि
णोत्तरयोः प्रागायतेपूर्वरेखायाअसंसृष्टे प्रादेशसंमितेद्वेलेखेउल्लिखेत्तयोर्मध्येद
क्षिणतआरभ्यपरस्परमसंस्पृष्टाः उदक्संस्थाः प्रागायताः प्रादेशसंमिताः स्तिस्र
इतिषड्लेखाय ज्ञियशकलमूलेनदक्षिणहस्तेनोल्लिख्यलेखास्कृतछकलमुद
ग्यंनिधायस्थंडिलमद्भिरभ्युक्ष्य शकलमाग्नेय्यांनिरस्यपाणिंप्रक्षाल्यवाग्यतोभवे
त् ॥ ततस्तैजसेनासंभवेमृन्मयेनवा। पात्रयुग्मेनसंपुटीकृत्यसुवासिन्याश्रोत्रिया
गारात्स्वगृहाद्वासमृद्धंनिर्धूममग्निमाहृत्यस्थंडिलादाग्नेय्यांनिधाय ॥ अस्य
ग्नेराह्वगणोगौतमोऽग्निस्त्रिष्टुप्। जुष्टोदमूनाआत्रेयोवसुश्रुतोऽग्निस्त्रिष्टुप् ॥

अग्न्यावाहनेविनियोगः॥ ॐ एह्यग्ने॰जुष्टोदमूनाह्यक्षैतैरावाह्याछादनंहूंह्रींक्लंसमस्त
२ व्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृहती॥ अग्निप्रतिष्ठापनेविनियोगः॥
ॐ भूर्भुवःस्वरित्यात्माभिमुखंपाणिभ्यांपट्टसुलेखवास्तुतन्तत्कर्मसुविहित नामसु
कनाम।कमग्निंप्रतिष्ठापयामीत्यग्निंप्रतिष्ठाप्य॥ प्रोक्षितेंधनानिनिक्षिप्यवेणु
धमन्याप्रबोध्यध्यायेदेवं॥ चत्वारिशृंगागोतमोवामदेवोग्निस्त्रिष्टुप्॥ अग्निमू
र्तिध्यानेविनियोगः॥ ॐ चत्वारिशृंगात्रयो॰विवेश॥ स्मृतिमंत्रोयं॥ सप्तह
स्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः॥ त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मि २

तः॥स्वाहांतुदक्षिणेपार्श्वेदेवीं॥वामेस्वधांतथा॥बिभ्रद्दक्षिणहस्तेस्तुशक्तिमन्नंस्रुक्स्रु
वं॥तोमरंव्यजनंवामेघृतपात्रंचधारयन्॥मेषारूढोजटाबद्धोगौरवर्णोमहौजसः॥इ
ध्वजोलोहिताक्षःसप्तार्चिःसर्वकामदः॥आत्माभिमुखमासीनएवंरूपोहुताश
नःइति॥ततोयदिसमिधौदोसमारोपितोग्निस्तर्हिप्रत्यवरोहणंकार्यं॥तच्चैवं॥प्रत्यव
रोहेतिमंत्रस्यहिरण्यगर्भोग्निस्त्रिष्टुप्॥अग्निप्रत्यवरोहणेविनियोगः॥प्रत्यवरोह
जातवेदःपुनस्त्वंदेवेभ्योहव्यंवहनःप्रजानन्॥प्रजापुष्टिंरयिमस्मासुधेह्यथाभवयज
७ मानायशंयोः॥इतिमंत्रेणसमारोपिताग्निंसमिधंस्थापिताग्नौप्रक्षिपेदिति॥एतदंत
संस्थापितेग्नौहोमकार्यंनित्यधार्वितुहोमेतुनेतावत्॥ततःपार्वणस्थालीपाकेप्रधान

दिनात्पूर्वदिनेसद्यस्कालायांपौर्णमास्यामथवाकोवाप्रधानदिनस्यप्रातः औपासनंकृत्वान्वा
३ धानंकुर्वीत ॥ तत्रेत्थं ॥ आचम्यप्राणानायम्य समिद्द्वयंत्रयंवादायदेशकालौसंकृत्वाममो
पात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंदर्शपूर्णमासाभ्यांस्थालीपाकाभ्यांयक्ष्ये ॥
तत्रेदानींपौर्णमासेनयक्ष्ये ॥ दर्शेतु ॥ पूर्वसंकल्पितेनदर्शस्थालीपाकेनयक्ष्यइतिवि
शेषः ॥ तत्रदेवतापरिग्रहार्थमन्वाधानंकरिष्येइतिसंकल्प्यास्मिन्नन्वाहितेग्नौजातवे
दसमग्निमिध्मेन प्रजापतिंप्रजापतिंचाघारदेवते आज्येन अग्नीषोमौचक्षुषी आ
ज्येन अग्निमग्नीषोमौप्रधानदेवते चरुद्रव्येण दर्शेतु अग्निमिंद्राग्नीचप्रधानदेवतेच २

रुद्रश्चेणेति विशेषः ।। शेषेण स्विष्टकृतमग्निमिध्मसंनहनेन रुद्रमयासाग्निं देवान्विष्णुमग्निं वा म
युं सूर्यं प्रजापतिं चैताः प्रायश्चित्तदेवता आज्येन ज्ञाताज्ञातदोषनिवर्हणार्थं त्रिवारमग्निं म
रुतश्चाज्येन विश्वान्देवान्संस्रावेण अंगदेवताः प्रधानदेवताः सर्वाः संनिहिताः संतु एवं
सांगेनांगेन कर्मणा श्वोयक्ष्ये ।। सद्यस्काले तु सद्यो यक्ष्य इति संकल्प्य तूष्णीं समस्तव्या
हृतिभिर्वा समिद्धोमं कुर्यात् ।। व्याहृतिपक्षे व्याहृतीनामित्यादि पूर्ववत् ।। अन्वाधा
ने समिद्धोमे विनियोगः ।। ॐ भूर्भुवः स्वः स्वाहेति प्रजापतय इदं न ममेति त्यागः ।।
ततोग्निं धारयेत् ।। संकटे तु तुभ्यं ता अंगिरस्तम इत्यृचाज्यं हुत्वा समारोपयेत् ।।
तद्यथा ।। तुभ्यं ता विरूपोग्निर्गायत्री ।। कृतान्वाधानाग्नेः समारोपाधिकारसिध्य

र्थंप्रायश्चित्ताज्याहुतिहोमे विनियोगः ॥ तुभ्यंता अंगिरस्तम विश्वाः सुक्षितयः पृथक् ॥
अग्नेकामाययेमिरेस्वाहा ॥ अग्नयइदं ॥ ततस्त्रिभिस्त्रिभिः कुशदलैः सव्यपाणिम
४ धोदक्षिणंचोपरिकुर्वन्पूर्वदलाग्रेणोत्तरदलमूलेश्वत्रिसंधिंद्विगुणांरज्जुंकृत्वापुनर्दक्षि
दं४ णमधःसव्यंचोपरिकुर्वंस्तथैवत्रिगुणंयेतेसदक्षिणंयंथिंदद्यात् ॥ एवंषट्त्रिंशद्दर्भद द्र.अं
लैरेकारज्जुर्भवति ॥ ततस्तस्यामुदगग्रायांप्रादेशमात्रांमुष्टिपरिमितांदर्भान्निधाय
तयाबर्हिर्द्विरावेष्ट्यरज्ज्वग्रेणरज्जुमूलंसकृदावेष्ट्यतदग्रशेषंपूर्ववेष्टितरज्ज्वाअधस्ता मा
न्निनीयपरिस्तरणाद्यर्थंदर्भैःसहाग्न्यायतनात्पश्चादग्नेरुपरिनिदध्यात् ॥ ततोन्य ४

यातादृश्येवकृतयारज्वाउदगग्रयाप्रालाशीरज्वादिरमसंभवेग्रामीवृटादियज्ञियवृक्षस्यमरत्नि
मात्रंवितस्तिमात्रंवापंचदशदारुकमिध्मंप्रागग्रंसकृद्वावेष्ट्यरज्वायेनरज्जुमूलंसकृद्वावेष्ट्य
पूर्ववंनिदध्यात् ॥ अत्रेध्माबर्हिषोश्चसंनहनेकेचिन्मंत्रमिच्छंति ॥ तत्रबर्हिषि ॥ इंद्रा
ण्यैसंनहनंपूषातेग्रंथिंबध्नातुसतेमास्थादितिद्वेध्मपत्नूछ्रोरूपंहत्वाग्नाविशल्त्वंवन
स्पतीन् ॥ ततस्त्वांपंचदशाधासंभेरामिस्कसंभृता कृष्णोरूपाणेरेखेष्ठादेवपु
रस्वरसध्यास्तस्याइतिएकविंशतिधेत्यत्रपंचदशाधेत्यूहेन ॥ अन्येत्वनूहमाहुः ॥ अ
परेतुमंत्रौनेच्छंति ॥ ततःपत्नीअस्यायतनालंकरणंकुर्यात् ॥ ततोदंपतीगंधादि

स्था॰प॰पा॰ भित्वशरीरेअलंकृत्यतद्दिनेकलंकपरिक्रं ग्रहास्तानृतवक्रभाषणचौर्याद्दिव्यसनपर्यंक य
पेशेनदंतधावनकरंभकुलित्थकोद्रवचणकमसूरवृंताकक्षारलवणकोरदूषकमधु
माषमांसमद्यपरान्नोपवासतैलमैथुनानिवर्जयंतो॥ दधिघृतपयोमिश्रंहविष्या
न्नंदिवैवसकृद्भुंजीयातां॥ श्राद्धकर्तुः॥ श्राद्धशेषमाषाद्यन्नंभुंजीत॥ व्रतलोपप्रा
प्तेः सहसंवेशने वा उपोष्य त्वमग्नेव्रतपा असि। इत्याज्याहुतिंजुहुयात्॥ नधय॥
त्वमग्नेव्रतपा असि इत्यस्यवत्सोऽग्निर्गायत्री॥ व्रतलोपजनितदोषपरिहारार्थंआज्य ९
होमेविनियोगः॥ त्वमग्नेव्रतपा असिदेव आमर्त्येष्वा। त्वंयज्ञेष्वीड्यः स्वाहा॥ व्रतपा

याऽइदंनमम॥ पश्चान्निर्वापादिपूर्वकंश्रृतपायाग्नेयपार्वणस्थालीपाकेन समानतंत्रं
चरुंप्रधानंसूर्यंजुहुयात्॥ ततःप्रणीतापादिप्रागन्तरौपासनंकृत्वा अग्निंपरिसमुह्य
परिस्तृणीयात्॥ तच्चेत्थं॥ अग्न्यायतनदशांगुलिपरिमितेदेशेऐशानींदिशमा
रभ्यप्रदक्षिणंसमंतात्लौकिकेनपाणिनात्रिःपरिमृज्यपूर्वमुपरिनिहितैर्द
र्भैर्दशांगुलिपरिमितेदेशेप्राच्यादिषुपरिस्तृणीयात्॥ तत्रप्राच्यांप्रतीच्यां
चोदगग्रादर्भाः॥ अवाच्यामुदीच्यांप्रागग्रादर्भाः पूर्वपश्चात्परिस्तरमूलयो
रुपरिदक्षिणपरिस्तरणं॥ एकैकस्यांदिशिचत्वारइत्येवंषोडशवा॥ ततोग्नेर्द
क्षिणतोब्रह्मासनार्थंउत्तरतश्चपात्रासादनार्थंकांश्चित्प्रागग्रान्दर्भान्स्तृणी
उत्तरपरिस्तरणंतुतदग्रयोरधस्तात्तत्रदर्भाअनीयतसंख्या॥ २

स्था॰पा॰ याद्॥ अग्नेरीशानीतस्त्रिरंभसापरिषिच्य॥ उत्तरास्तीर्णेषु दर्भेषु दक्षिसव्यपाणि ण
६ भ्यां क्रमेण चरुस्थालीं प्रोक्षिण्यौ दर्वी स्रुक्स्रुवौ प्रणीता आज्यपात्रे इध्माबर्हिषि
शूर्पकृष्णाजिनमुलूखलमुसलं चेति द्वे द्वे उदगपवर्गमाक्रसंस्थं चान्वनुज्ञान्यासा
दयेत्॥ आज्यमात्रहोमे तु प्रोक्षण्यौ स्रुक्स्रुवौ प्रणीता आज्यपात्रे इध्माबर्हिषी चेत्ये
तामेवासादनं॥ ततः प्रोक्षणीपात्रमुत्तानं कृत्वा तत्र अंतर्गर्भितसाग्रसमस्थूल नं
प्रादेशमात्रकुशद्वयरूपे पवित्रे निधाय शुद्धाभिरद्भिस्तत्पात्रं पूरयित्वा गंध
पुष्पाक्षतादिभिः क्षिप्त्वा हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यां उदगग्रे पृथक्रूप ६

वित्रेधृत्वा अपआसिक्तस्रुवपात्राण्युत्तानानि कृत्वा इध्मं विस्रस्य सर्वाणि पात्राणि त्रिः प्रोक्षयेत्॥
ताआपः किंचित्कमंडलौ क्षिपेदित्येके ततोयथोक्तलक्षणंमैशानादिगवस्थितंब्रह्माणम
स्मिन्कर्मणिब्रह्माणंत्वामहंवृणेइतितत्पाणिंपाणिनागृहीत्वावृणुयात्॥ ततोब्रह्मावृतो
स्मीत्युक्त्वाप्राङ्मुखोयज्ञोपवीत्याचम्यसमस्तपाण्यंगुष्ठोभूत्वाग्नेणाग्निंपरीत्यद
क्षिणउदङ्मुखस्थित्वाआसनार्थदर्भेषु [illegible] दक्षिणभागस्थमेकंदर्भमंगु
ष्ठ[illegible]नामिकाभ्यांगृहीत्वानिरस्तः परावसुरितिनैर्ऋत्यांनिरस्यापउपस्पृश्यइदमहम
र्वावसोः सदनेसीदामीत्युक्त्वो[illegible]दङ्मुखएववामोरूपरिदक्षिणपादंसंस्थाप्यो

पविश्यगंधाक्षतादिभिरर्चितः संन् ॥ ॐ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते
७ बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि इति जपित्वा सदा
यज्ञमनाप्स्व वर्तेन । ततो यजमानः । प्रणीतापात्रमग्नेः प्रत्यङ् धायोत्पूतो निर
भिरद्भिः + येत्तत्रते पवित्रे निधो + स्तत्पात्रं पूरयित्वा गंधपुष्पाक्षतान् निक्षिप्य
मुखसमं धृत्वा मेरुत्तरतो दर्भेषु निधाय पवित्रे गृहीत्वान्यैर्दर्भैराच्छादयेत् ॥ ततः
प्रसगग्नेः कुशेषु शूर्पं निधाय तत्र आग्नेयपवित्रे निधायाग्नये त्वा जुष्टं निर्वपा
मीति मंत्रं अहृत्या व्रीहीणां यवानां वा चतुरो मुष्टीं निरूप्याग्नीषोमाभ्यां त्वा ७

अविदग्धमनवस्राविलमंतरूष्मपक्वंस्कष्टंतंचरुंपचेत्॥ततःपवित्रेआज्यपात्रेनिधा
यतत्पात्रंपुरतःसंस्थाप्यतस्मिन्नाज्यमासिच्याग्नेरुत्तरतःस्थितांगारान्भस्मनासहा
ग्नेरुदक्परिस्तरणाद्बहिर्निरूह्यतेषुआज्यपात्रमधिश्रित्यज्वलतादर्भोल्मुके
नावज्वल्यांगुष्ठपर्वमात्रंप्रक्षालितंदर्भाग्रद्वयमाज्येप्रक्षिप्यपुनर्ज्वलतातेनैवद
र्भोल्मुकेनचरुणासहाज्यंत्रिःपर्यग्निकृत्वातदुल्मुकमपास्यापस्पृश्याज्यपात्रमु
दिकर्षन्निधायोदगुद्वास्यांगारानग्नौप्रत्यस्यापस्पृश्यतत्रस्थमेवाज्यं॥सवितुष्ट्वाहि
रण्यस्तूपःसवितापुरउष्णिक्॥आज्यस्योत्पवनेविनियोगः॥सवितुष्ट्वाप्रसवउ

इति जुष्टंनिर्वपामिंतथैवनिरूप्यतेपवित्रेव्रीहीणामुपरिनिधायोत्पूताभिरद्भिरग्नयेत्वाजुष्टंप्रोक्षा
मीतिनिर्वापसंख्ययोत्पूताभिरद्भिः प्रोक्षयेत्।। एवमग्नीषोमाभ्यांत्वाजुष्टंप्रोक्षा
मीतितथैवप्रोक्षयेत्।।दर्शेतु अग्नीषोमस्थानेइन्द्राग्निभ्यांत्वेत्यादिनिर्वापप्रोक्षणे
चविशेषः।। एवंनाममंत्रकहोमेनिर्वापः।। प्रोक्षणंचयथाप्रधानदेवतंदेवतोभय ना
ग्रहणेनकार्यं।।समंत्रकहोमेतुश्रवणाकर्मादौतूष्णींचतुरश्चतुरोमुष्टीन्निर्वपेत्प्रोक्षेच्च।।
ततःपात्राणामुत्तरतःप्राग्ग्रीवमास्तीर्णेऊर्ध्वलोम्निकृष्णाजिनेनिहितेउलूखले
मुसलेनपत्न्यवहतित्रिःशुक्लीकुर्यात्।।तांस्त्रिःप्रक्षालितान्पृथक्पात्रेएकपात्रेवा

सुनाम्यच्छिद्रेणपवित्रेणवसोः सूर्यस्यरश्मिभिरिति मंत्रेणैकश्रुत्याचारितेनेकवारंहस्त
स्थमुत्तानपाणिद्वयांगुष्ठाम कनिष्ठिकाभ्यामंतरमोरस्संहृष्टं गृहीताभ्यामुदगग्राभ्यांप्रा स्रु
गुत्पूयतेपवित्रेअद्भिः प्रोक्ष्याग्नौप्रहरेत्॥ नूछंस्कंदा स्वाहेतिकेचित्॥ अथाग्नेःपश्चा
त्परिस्तरणाद्बहिरात्मनोयतोभूमिंप्रोक्ष्यतत्रबर्हिः सन्नहनंरज्जुमुदगग्रांप्रसार्य
तस्यांबर्हिः प्रागग्रमुदगपवर्गमविरलमास्तीर्यतस्मिन्नाज्यपात्रंनिधायस्रुवादिसं
मार्जयेत्॥ तद्यथा॥ दक्षिणेनहस्तेनस्रुवंगृहीत्वासव्येनकांश्चिद्दर्भानादायस
हैवाग्नौप्रतापस्रुवंनिधायदक्षिणहस्तेनस्रुवस्याबिलंदर्भाग्रैः प्रागादिप्रागपवर्गंत्रिः
संमृज्याधस्ताद्दर्भाग्रैरेणैवाभ्यात्मबिलपृष्ठंत्रिः संमृज्यतलोदर्भाणांमूलैर्दंडस्याधस्ता

८ बिलप्रभृत्यारभ्ययावदुपरिष्टाद्बिलंतावत्त्रिःसंमृज्याद्भिःप्रोक्ष्यस्रुवंनिष्टप्याज्यस्थाल्याउत्तरतः
स्रुगग्रस्पृष्टेनिधायोदकंस्पृष्ट्वातैरेवदर्भैर्जुहूंचैवमेवसंमृज्यस्रुवादुत्तरतोनिधायदर्भान
द्भिःक्षालयित्वाग्नावनुप्रहरेत्॥ततःश्रपणंचरुंस्रुवंगृही[illegible]तेनाज्येनाभिघार्योदगुद्वास्या
ग्न्याज्ययोर्मध्येननीत्वाज्याद्दक्षिणतोबर्हिषिसांतरमासाद्यपुनरप्यभिघार्यहविःपृथक्क नत्वाभिघार्य
रणायपात्रंतरेणवाज्ययोर्मध्येनिधायैकादशांगुलिमितेदेशेगंधाक्षतपुष्पैरग्निंसमंत्रम
र्चयेत्।तत्रमंत्रो।विश्वानिनइत्यनयोर्वस्रुश्रुतोग्निस्त्रिष्टुप्॥अग्न्यर्चनेविनियोगः।
विश्वानिनोदुर्गहाजातवेदः स्रक्‌२॥ततःआत्मानंचालंकृत्यहस्तंप्रक्षाल्यइध्मबंध ८
नरज्जुमिध्मस्थानेनिधायपाणिनेध्ममादायमूलमध्याग्रेषुस्रुवेणत्रिरभिघार्यमूल

इत्येताभ्यांगंधाक्षतपुष्पैरग्निमभ्यर्च्य

मध्ययोर्मध्यभागेगृहीत्वा ॥ अयंतेवामदेवोजातवेदाअग्निस्त्रिष्टुप् ॥ इध्महवनेविनियो
गः ॥ ॐ अयंतइध्मआत्माजातवेदस्तेनेध्य वर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसे स्वर्ध
नान्नाद्येनसमेधयस्वाहेतीध्ममग्नावाधायजातवेदसेऽग्नयइदंनममेतित्यागः ॥ ततः स्वेध
स्रुवेणाज्यमादायाग्नेरायतनस्यवायव्यकोणमारभ्याग्नेयकोणपर्यंतंप्रजापतइतिम य
नसास्मरन्स्वाहेत्युच्चार्यनैरंतर्येणाज्यधाराअग्नाविध्मदारूपरिकृत्वापुनराज्यमाय
तननैर्ऋत्यकोणलईशानीकोणपर्यंतंतथैवकृत्वात्यक्त्वाचस्रुवेणाज्यमादायाग्नये
स्वाहेत्यग्नेरुत्तरपार्श्वेपूर्वभागेकृत्वापुनराज्यंसोमायस्वाहेत्यग्नेर्दक्षिणपार्श्वेतत्स

मध्यदेशेकृत्वापूर्ववदभिहितपात्रेचरुंस्रुधृत्यपृथक्कृत्यइदमग्नयेइदमग्नीषोमाभ्यामितिचरुभाग
२० द्वयमुत्तरसंस्थमभिमृश्यावदानधर्मेणजुहुयात्॥एवंनाममंत्रहोमेयथादैवतंविभक्तस्यच
रोरभिमृश्यसमंत्रकहोमेतुनविभागोनाभिमर्शश्च॥अथावदानधर्मः॥स्रुवेणस्रुच्याज्य
मुपस्तीर्यप्रथमप्रधानदेवताचरुभागमध्यादंगुष्ठपर्वमात्रंतिरश्चीनाभिरंगुष्ठमध्यमाना
मिकाभिरुदग्राभिः नखसंस्पर्शमकुर्वन्नवदायदर्व्यामोप्यततश्चरुपूर्वभागंप्रागग्रा
भिस्तथैवादायदर्व्यामोप्यपात्रस्थंहविरभिघार्यदर्विस्थमवत्तंचाभिघार्यविधूमज्वाला २०
ग्नौअग्नयेस्वाहेत्याज्यभागयोर्मध्यदेशेतत्रत्यस्वदेशेवा आच्छद्यंनिवदर्व्यापार्श्वेनकृत्वा

अग्नयइदंनममेतित्यक्त्वापुनःपूर्ववदुत्तरेहविर्भागादवदाय॥ॐअग्नीषोमाभ्यांस्वाहे

तिपूर्ववत्कृत्वाप्राग्भागेकृत्वाअग्नीषोमाभ्यामिदन्नममेतित्यजेत्॥पंचावत्तीतुदर्व्यामु

सश्राद्धी पस्तीर्यमध्यात्पूर्वार्धाच्चहविषोवदायाभिघार्यजुहुयात्॥पंचावत्तिनःस्युः॥जामद त्रि

ग्न्यावत्साविदावार्ष्टिषेणास्तथैवच॥भार्गवच्यवनौऔर्वाःपंचावत्तिनईरिताः॥दर्शेतुअ

ग्नीषोमस्थानेइंद्राग्निभ्यांस्वाहा॥इंद्राग्निभ्यांनममेतिविशेषः॥पुनर्दर्व्यामुपस्तीर्यत्र

मै यंहविर्भागस्योत्तरार्धात्पूर्वावदानतोभूयोनूर्चानाभिरेवांगुलीभिरवदायदर्व्यामिति मोघ २

तु यहविर्भागस्यतथैवावदायपंचावत्तीहविर्भागद्वयेऽप्युत्तरार्धात्पूर्वार्धाद्धविर्द्वयंदेवेय

मिदं

स्था॰पा॰ भि पात्रस्थमनभिघार्यावत्तंतुहविरभिघार्य ॥ यदस्येतिहिरंण्यगर्भोग्निरनिष्टुप्तिः ॥ स्विष्टकृद्धो
११ मेविनियोगः ॥ ॐ यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृ
द्विद्वान्सर्वंस्विष्टंसुहुतंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ता
हुतीनांकामानांसमर्द्धयित्रेसर्वान्नःकामान्त्समर्धयस्वाहेत्येकमुत्योत्तरार्धेअग्ना
वीशानदेशेजुहुयात् ॥ स्विष्टकृतेअग्नयइदंनममेतित्यागः ॥ ततोग्नेरुत्तरतस्थिता
मिध्मबंधनरज्जुंविसृस्यरुद्रायस्वाहेतिहुत्वापस्पृष्ट्वास्रुवेणसप्तप्रायश्चित्ताज्या ११
हुतीर्जुहुयात् ॥ तत्रमंत्राः ॥ अयाश्चेतिविमदोयाज्ञोग्निःपंक्तिः ॥ प्रायश्चित्ताज्य

होमेविनियोगः॥आयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि॥अयासावयसाकृतोयासंन्हव्य
मूहिषेयानोधेहिभेषजंस्वाहेत्येकस्त्रुत्याजुहुयात्॥अयसेग्नयइदं०॥अतोदेवामेधातिथिर्देवागाय
त्री॥विनियोगःसर्वत्रप्राग्वत्॥अतोदेवाअवंतुनःसूक्त१॥स्वाहादेवेभ्यइदं०॥इदंविष्णुर्मेधातिथिर्विष्णु
र्गायत्री॥ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥सूक्त॥विष्णवइदं०॥व्यस्तसमस्तव्याहृतीनांवि
श्वामित्रजमदग्निभरद्वाजप्रजापतयोग्निर्वायुःसूर्यःप्रजापतयोगायत्र्युष्णिगनुष्टुप्बृहत्यः॥
ओंभूःस्वाहा॥अग्नयइदंनमम॥ओंभुवःस्वाहावायवइदं०॥स्वःस्वाहासूर्यायइदं०॥ओंभूर्भुवःस्वःस्वाहा व
हाप्रजापतयइदं०॥७॥ततोब्रह्माकर्तारंपरीत्याग्नेर्वायव्यदेशेतिष्ठंनेताएवसंस्राव्याहुती

यतनिमित्तेसतियद्वोदेवा अभितपामरुतास्त्रिष्टुप्॥ मंत्रविपर्यासादिनि १

४२ र्जुहुयात्॥ त्यागंयजमानोनकुर्यात्॥ ततस्तत्रस्तो ब्रह्मैवमंत्रविपर्यासादिनिमित्तकप्रायश्चित्ता
ज्यहोमेविनियोगः॥ ॐयद्वोदेवा अतिपातयानिवाचाचप्रयुती देवहेळनं॥ अरायो अस्माँ अभिदु
छुनायतेन्यत्रास्मन्मरुतः तं निधेतनस्वाहा॥ यजमानः मरुद्भ्य इदं॥ अनाज्ञातमि
तिमंत्रद्वयस्यहिरण्यगर्भोग्निरनुष्टुप्॥ ॐअनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु॥
अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथँस्वाहा॥ यजमा॰॥ अग्नयइदं॥ पुरुषसंमितो
यज्ञोयज्ञःपुरुषसंमितः॥ अग्नेतदस्यकल्पयत्वँ॥ यजमानः अग्नय॥ यत्पाकत्रेत्या ४२
प्रस्कण्वोग्निस्त्रिष्टुप्॥ ॐ यत्पाकत्रामनसादीनदक्षादे स्वक॥ २य॰ अग्न॰॥ स्कन्नाभि
न्यूनातिरिक्तपरिपूर्णहोमेविनियोगः ३+
४+ ज्ञाताज्ञातकृतदोषपरिहारार्थमाज्यहोमे विनियोगः ४+

न्नाद्यनियतनिमित्तेसतियक्ष्यमाणप्रकारेणतत्रप्रतिपदोक्तजपहोमान्कुर्यात्।
ब्रह्मा।।ब्राह्मणोभावेयजमानएवैतान्प्रायश्चित्तादीन्कृत्वान्यस्मैवरंदद्यात्।।ततो
यजमानःसर्वकर्मप्रपूरणंभद्रद्रव्यदांपूर्णाहुतिंजुहुयात्।।तद्यथा।स्रुवेणाज्यं
गृहीत्वास्रुचंसमबिलान्पूरयित्वातस्यांस्रुवबिलंमूर्ध्वंनिधायपुनरधोबिलंनिक्षि
प्यस्रुक्पार्श्वेकुंकुमाक्षतंनिधायसव्यपाणिनास्रुक्कक्कवमूलेधृत्वादक्षिणपाणि
नास्रुक्वंशंरवमुद्रयागृहीत्वातिष्ठन्समपादऋजुकायःस्रुवाग्रन्यस्तदृष्टिःप्र
सन्नात्मा।।समुद्रादूर्मिरित्येकादशर्चस्यसूक्तस्यवामदेवआपस्त्रिष्टुप्।।अंत्या
जगतीपूर्णाहुतौविनियोगः।।समुद्रादूर्मिर्मधुमाँउदारत्।।१।स्वाहेतिपठन्

पूर्वपरिमितधारां संततां स्रुवेण सशेषं कृत्वा अग्नय इदं न मम इत्युद्दिश्य त्यक्त्वा विज्योतिषेत्य
२३ स्यजागतो वृषोग्निस्त्रिष्टुप् ॥ विज्योतिषा बृहता भात्यग्निः स्वः ॥१ इत्यनेन तथैवावशिष्टं हु
त्वा अग्नय इदं न मम त्यक्त्वा विश्वेभ्यो देवेभ्यः स्वाहेति संस्रावं कृत्वा विश्वेभ्यो देवेभ्य इदं न०
ततः स्रुक्स्रुवौ कुशकणान्तस्मिन्दर्भशकलान्यद्भिः प्रोक्ष्याग्नौ प्रहरेत् ॥ पूर्णाहुत्यादिकं तत्समूलं न
प्रयोगपारिजातकारेण लिखितमपीदानीं शिष्टा नैव कुर्वन्ति ॥ अथावभृतस्थानीयं पूर्णपा
त्रजलेन मार्जनं कुर्यात् ॥ तद्यथा ॥ पूर्वासादितं पूर्णपात्रमास्तीर्णे बर्हिषि दक्षिणे
पाणिना निधाय तत्र गंगादिपुण्यनदीः स्मरन् ॥ दक्षिणपाणिना स्पृशन् ॥ पूर्णमसि पूर्णं २३
मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षिति

रसिमामेक्षेष्ठाइतिजपित्वाकुशाग्रैः प्रागादिपंचसुदिक्षुजलंमंत्रैर्यथालिंगंसिंचेत्॥ तेचमंत्राः॥८
प्राच्यांदिशिदेवाऋत्विजोमार्जयंतांदक्षिणस्यांदिशिमासाःपितरोमार्जयंतांप्रतीच्यांदि
शिग्रहाःपशवोमार्जयंतांउदीच्यांदिश्यापॐषधयोवनस्पतयोमार्जयंतांऊर्ध्वायांदिशियज्ञः
संवत्सरःप्रजापतिर्मार्जयंतामित्येकस्मिन्सुत्रापठेत्॥ प्रतिदिशंसिक्त्वाकुशाग्रैःस्वशिरसिमार्जये
त्॥ आपोअस्मानित्यस्यदेवश्रवाआपस्त्रिष्टुप्॥ मार्जनेविविनियोगः॥ आपोअस्मान्मातरः॰
इदमापःसिंधुद्वीपआपोनुष्टुप्॥ मार्जने॰॥ इदमापःप्रवहत्युक्॥ सुमित्र्यानआपॐषधयः
संतुइत्येतैर्मंत्रैर्जातेमार्जनंकृत्वादुर्मित्र्यास्तस्मैसंतुयोस्माद्द्वेष्टियंचवयंद्विष्मस्तंहन्मिइतिनिर्ऋते

देशेकुशाग्रैरपः सिंचेत्॥ ततोब्रह्मायजमानवामपार्श्वेस्थितपत्न्यंजलौपूर्णपात्रस्थंजलंमाहेंद्रंजाप
९४ रासिचयानः सयावरीस्थन॥ समुद्रंवोनिनयामिस्वंपाथोअपीथेतिमंत्रमेकश्रुत्यापत्न्यावावयं यजमानं
वा न्वयंपठेत्॥ प्राङ्मुखंनिषिच्यांजलिस्थजलैः पापापनोदार्थमात्मानंपत्नींचप्रोक्षयेत्॥ पत्नीतज्जलंबर्हि
षिनिषिंचेत्॥ अथवायजमानएवस्ववामपाणौधृतानेबर्हिषि निधायतत्रदक्षिणपाणिनापूर्णपात्रमा
दायमाहेंद्रजामित्येनेनतज्जलंप्रत्यङ्मुखंनिषिच्य ताआपःसमुद्रंगच्छंतीतिध्यात्वापाणिस्थजलैरा
त्मानंपत्नींचप्रोक्षयेत्॥ ततःकर्ताग्नेर्वायव्येस्थितःसंस्थाजपेनोपतिष्ठेत॥ अग्नेत्वंनइतिचतसृणांगौ
गौपायना पायनावाबंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुश्चैकर्चाऋषयः॥ अग्निर्देवताद्विपदाविराट्छंदः॥ अग्न्युपस्था ९४
नेविनियोगः॥ ॐ अग्नेत्वंनोअंतमउतत्राताशिवोभवावरूथ्यः॥ इतिद्वेऋक्॥ ॐ चमेस्वरश्चमेय०

न देहिमेहव्यवाहनोनमोनमः॥ ततोब्रह्मापूत्रैवदस्थित्वाप्रतैरेवोपतिष्ठेत॥ ततःकर्ताआचारात्॥ मा
नस्तोकेतिकुत्सोरुद्रोजगती॥ विभूतिग्रहणेविनियोगः। ॐ मानस्तोकेतनयेमानआयोरूक॥ इति
स्रुवबिलपृष्ठेनविभूतिंगृहीत्वा॥ त्र्यायुषंजमदग्नेरितिललाटे॥ कश्यपस्यत्र्यायुषमितिकंठे॥ अग
स्त्यस्यत्र्यायुषमितिनाभौ॥ यद्देवानांत्र्यायुषमितिदक्षिस्कंधे॥ तन्मेअस्तुत्र्यायुषमितिदक्षिण
स्कंधे॥ सर्वमस्तुशतायुषमितिशिरसिधारयेत्॥ केचित्तूपस्थानात्पूर्वंविभूतिधारणमाहुरिति॥
ततःकर्तापरिस्तरणानिविसृज्यअग्निंपरिसमुह्यपरिषिच्यपुष्पादिभिरलंकृत्यनैवेद्यतांबूलंच
निवेद्यब्रह्मणेयथोक्तदक्षिणांदक्षिणाभावेकृतशेषघृतादिसहिरण्यंदत्वाब्रह्माभावेन्यस्मैब्राह्मणा
यदद्यात्॥ पात्राणिचप्रक्षाल्यपूर्ववत्क्रमेणद्वंद्वंशःउत्सृज्य यस्यस्मृत्येतिमंत्र॥ विष्णुनत्वाचं

स्यधृतपवित्रंग्रंथिंविस्रस्यप्रत्यग्देशेप्रक्षिपेत्॥ दर्शेतुअग्नीषोमस्थानेइंद्राग्नी।इतितत्सर्वंसमानंतत्रदर्शितमे
१५ वासघस्कालायांपौर्णमास्यामगत्योभयत्रवायागदिनएवप्रातर्होमानंतरमन्वाधायेध्माबर्हिषि
संनह्येष्टिप्रयोगंकुर्यात्॥ ७ ७ ॥ ७ ७ ७ ५॥इतिश्री विद्वन्मुकुटमाणिक्यश्रीमद्रामेश्वरसूनु
नारायणभट्टविरचितप्रयोगरत्नेपार्वणस्थालीपाकप्रयोगः ७ ७ ॥श्री।अग्नेष्टिप्रायश्चित्तानि॥
शके १७२६ रक्ताक्षीसंवत्सरेआषाढशुद्धप्रतिपद्यांभानुवासरेतद्दिनेसंपूर्णमस्तु।।वेषिधन्वलेलंतूषै १५
लासिंगेपं ७